श्री सरस्वती रहस्य स्तोत्रं

श्री सरस्वती रहस्य स्तोत्रं

नीहारहारघनसारसुधाकराभां
कल्याणदां कनकचंपकदामभूषां |
उत्तुंगपीनकुचकुंभमनोहरांगीं
वाणीं नमामि मनसा वचसा विभूत्यै || 1 ||

या वेदांतार्थतत्त्वैकस्वरूपा परमेश्वरी |
नामरूपात्मना व्यक्ता सा मां पातु सरस्वती || 2 ||

या सांगोपांगवेदेषु चतुर्ष्वेकैव गीयते |
अद्वैता ब्रह्मणः शक्तिः सा मां पातु सरस्वती || 3 ||

या वर्णपदवाक्यार्थस्वरूपेणैव वर्तते |
अनादिनिधनानंता सा मां पातु सरस्वती || 4 ||

अध्यात्ममधिदैवं च देवानां सम्यगीश्वरी |
प्रत्यगास्ते वदंती या सा मां पातु सरस्वती || 5 ||

अंतर्याम्यात्मना विश्वं त्रैलोक्यं यानि यच्छति |
रुद्रादित्यादिरूपस्था सा मां पातु सरस्वती || 6 ||

या प्रत्यग्दृष्टिभिर्जीवैर्व्यजमानानुभूयते |
व्यापिनी ज्ञप्तिरूपैका सा मां पातु सरस्वती || 7 ||

नामजात्यादिभिर्भेदैरष्टधा या विकल्पिता |
निर्विकल्पात्मना व्यक्ता सा मां पातु सरस्वती || 8 ||

व्यक्ताव्यक्तगिराः सर्वे वेदाद्या व्याहरंति यां |
सर्वकामदुघा धेनुः सा मां पातु सरस्वती || 9 ||

यां विदित्वाखिलं बंधं निर्मथ्याखिलवर्त्मना |
योगी याति परं स्थानं सा मां पातु सरस्वती || 10 ||

नामरूपात्मकं सर्वं यस्यामावेश्य तां पुनः |
ध्यायंति ब्रह्मरूपैका सा मां पातु सरस्वती || 11 ||

चतुर्मुखमुखांभोजवनहंसवधूर्मम |
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती || 12 ||

नमस्ते शारदे देवि काश्मीरपुरवासिनी |
त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे || 13 ||

अक्षसूत्रांकुशधरा पाशपुस्तकधारिणी |
मुक्ताहारसमायुक्ता वाचि तिष्ठतु मे सदा || 14 ||

कंबुकंठी सुताम्रोष्ठी सर्वाभरणभूषिता |
महासरस्वती देवी जिह्वाग्रे सन्निवेश्यतां || 15 ||

या श्रद्धा धारणा मेधा वाग्देवी विधिवल्लभा |
भक्तजिह्वाग्रसदना शमादिगुणदायिनी || 16 ||

नमामि यामिनीनाथलेखालंकृतकुंतलां |
भवानीं भवसंतापनिर्वापणसुधानदीं || 17 ||

यः कवित्वं निरातंकं भुक्तिमुक्ती च वांछति |
सोऽभ्यर्च्यैनां दशश्लोक्या नित्यं स्तौति सरस्वतीं || 18 ||

तस्यैवं स्तुवतो नित्यं समभ्यर्च्य सरस्वतीं |
भक्तिश्रद्धाभियुक्तस्य षण्मासात् प्रत्ययो भवेत् || 19 ||

ततः प्रवर्तते वाणी स्वेच्छया ललिताक्षरा |
गद्यपद्यात्मकैः शब्दैरप्रमेयैर्विपक्षितैः || 20 ||

अश्रुतो बुध्यते ग्रंथः प्रायः सारस्वतः कविः |
इत्येवं निश्चयं विप्राः साहोवाच सरस्वती || 21 ||

इति श्री सरस्वती रहस्य स्तोत्रं ||